# .. shrIkRiShNasya dvAvi.nshatyakSharo mantroH ..

# ॥ શ્રીકૃષ્ણસ્ય દ્વાવિંશત્યક્ષરાત્મકો મન્ત્રઃ ॥

## Document Information

Text title : kRiShNasya dvAvi.nshatyakSharo mantraH
File name : krishna22.itx
Location : doc_vishhnu
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Latest update : January 19, 2005
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીકૃષ્ણસ્ય દ્વાવિંશત્યક્ષરો મન્ત્રોઃ ॥

શ્રી ગણેશાય નમઃ ।
શૌનક ઉવાચ ।
કં મન્ત્રં બાલકઃ પ્રાપ કુમારેણ ચ ધીમતા ।
દત્તં પરં શ્રીહરેશ્ચ તદ્ભવાન્ વક્તુમર્હતિ ॥ ૧॥

સૌતિરુવાચ ।
કૃષ્ણેન દત્તો ગોલોકે કૃપયા બ્રહ્મણે પુરા ।
દ્વાવિંશત્યક્ષરો મન્ત્રો વેદેષુ ચ સુદુર્લભઃ ॥ ૨॥

તં ચ બ્રહ્મા દદૌ ભક્ત્યા કુમારાય ચ ધીમતે ।
કુમારેણ સ દત્તશ્ચ મન્ત્રશ્ચ શિશવે દ્વિજ ॥ ૩ ॥

ૐ શ્રીં નમો ભગવતે રાસમણ્ડલેશ્વરાય ।
શ્રીકૃષ્ણાય સ્વાહેતિ ચ મન્ત્રોઽયં કલ્પપાદયઃ ॥ ૪॥

મહાપુરુષસ્તોત્રં ચ પૂર્વોક્તં કવચં ચ યત્ ।
અસ્યૌપયોગિકં ધ્યાનં સામવેદોક્તમેવ ચ ॥ ૫॥

તેજોમણ્ડલરૂપે ચ સૂર્યકોટિસમપ્રભે ।
યોગિભિર્વાઞ્છિતં ધ્યાને યોગૈઃ સિદ્ધગણૈઃ સુરૈઃ ॥ ૬॥

ધ્યાયન્તે વૈષ્ણવા રૂપં તદભ્યન્તરસન્નિધૌ ।
અતીવકમનીયાનિર્વચનીયં મનોહરમ્ ॥ ૭॥

નવીનજલદશ્યામં શરત્પઙ્કજલોચનમ્ ।
શરત્પાર્વણચન્દ્રાસ્યં પક્વવિમ્બાધિકાધરમ્ ॥ ૮॥

મુક્તાપઙ્ક્તિવિનિન્દ્યેકદન્તપઙ્ક્તિમનોહરમ્ ।
સસ્મિતં મુરલીન્યસ્તહસ્તાવલમ્બનેન ચ ॥ ૯॥

કોટિકન્દર્પલાવણ્યલીલાધામ મનોહરમ્ ।
ચન્દ્રલક્ષપ્રભાજુષ્ટં પુષ્ટ શ્રીયુક્તવિગ્રહમ્ ॥ ૧૦॥

ત્રિભઙ્ગભઙ્ગિમાયુક્તં દ્વિભુજં પીતવાસસમ્ ।
રત્નકેયૂરવલયરત્ન નૂપુરભૂષિતમ્ ॥ ૧૧॥

રત્નકુણ્ડલયુગ્મેન ગણ્ડસ્થલવિરાજિતમ્ ।
મયૂરપિચ્છચૂડં ચ રત્નમાલાવિભૂષિતમ્ ॥ ૧૨॥

શોભિતં જાનુપર્યન્તં માલતીવનમાલયા ।
ચન્દનોક્ષિતસર્વાઙ્ગં ભક્તાનુગ્રહકારકમ્ ॥ ૧૩ ॥

મણિનાકૌસ્તુભેન્દ્રેણવક્ષઃ સ્થલસમુજ્જ્વલમ્ ।
વીક્ષિતં ગોપિકાભિશ્ચ શશ્વદ્વઙ્કિમલોચનૈઃ ॥ ૧૪॥
સ્થિરયૌવનયુક્તભિર્વેષ્ટિતાભિશ્ચ સન્તતમ્ ।
ભૂષણૈર્ભૂષિતાભિશ્ચ રાધાવક્ષઃ સ્થલસ્થિતમ્ ॥ ૧૫॥
બ્રહ્મવિષ્ણુશિવાદ્યૈશ્ચ પૂજિતં વન્દિતં સ્તુતમ્ ।
કિશોરં રાધિકાકાન્તં શાન્તરૂપં પરાત્પરમ્ ॥ ૧૬॥
નિર્લિપ્તં સાક્ષિરૂપં ચ નિર્ગુણં પ્રકૃતેઃ પરમ્ ।
ધ્યાયેત્ સર્વેશ્વરં તં ચ પરમાત્માનમીશ્વરમ્ ॥ ૧૭॥
ઇદં તે કથિતં ધ્યાનં સ્તોત્રં ચ કવચં મુને ।
મન્ત્રૌપયોગિકં સત્યં મન્ત્રશ્ચ કલ્પપાદપઃ ॥ ૧૮॥
॥ શ્રીકૃષ્ણસ્ય દ્વાવિંશત્યક્ષરો મન્ત્રો ધ્યાનં ચ સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. shrIkRiShNasya dvAvi.nshatyakSharo mantroH ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*